International Journal of Sanskrit Research 2021; 7(4): 230-233

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(4): 230-233
© 2021 IJSR
www.anantaajournal.com
Received: 15-05-2021
Accepted: 20-06-2021

**डॉ. नृसिंहनाथ गुरुः**
सहायकाचार्यः, साहित्यविभागः,
कलियाचकविक्रमकिशोर-
आदर्शसंस्कृतमहाविद्यालयः, हेडिया,
पूर्वमेदिनीपुरम्, पश्चिम बंगाल, भारत

**Corresponding Author:**
**डॉ. नृसिंहनाथ गुरुः**
सहायकाचार्यः, साहित्यविभागः,
कलियाचकविक्रमकिशोर-
आदर्शसंस्कृतमहाविद्यालयः, हेडिया,
पूर्वमेदिनीपुरम्, पश्चिम बंगाल, भारत

# श्रीगौरकृष्णोदये रसतत्वविमर्शः

**डॉ. नृसिंहनाथ गुरुः**

## प्रस्तावना

श्रीगौराङ्गदेवस्य जीवनचरित्रमाश्रित्य यथा वङ्गभाषायां सन्ति अनेके ग्रन्थास्तथैव संस्कृतेऽपि तद् विषयकं साहित्यं प्रचुरतरमुपलभ्यते । तत्र कविकर्णपूरस्य ''श्रीचैतन्यचन्द्रोदयनाटकं'', ''श्रीकृष्णचैतन्यचरितामृतमहाकाव्यं'' च सुप्रसिद्धमेव । श्रीगोविन्दकवि-विरचितं श्रीगौरकृष्णोदयमहाकाव्यमपि श्रीचैतन्यचरितं समुद्घाटयति । अयं गोविन्दकविः उत्कलप्रदेशे ''श्रीवक्रेश्वर-पण्डितस्य परिवारे जन्मलब्धवान् । असौ अष्टादशसर्गविशिष्टं सरसं सगुणं सालङ्कारं विविधच्छन्दोभिरलंकृतं ''श्रीगौरकृष्णोदयः'' इति नामधेयं महाकाव्यं वङ्गलिप्यां १६८० तमे शकाब्दे आश्विनकृष्णद्वितीयातिथौ विरचितवान् । यत्र भगवतः गौराङ्गमहाप्रभोः लीलाविलासः वर्णितः दृश्यते । अस्य रचयिता श्रीगोविन्दकविः यः स्वयमेव स्वकीयं नाम प्रतिसर्गं परिशेषे प्रकाशयति । यथा–

> श्रीगौराङ्गयतीन्द्रपुङ्गवपदद्वन्द्वारविन्दोदर
> प्रोन्मीलन्मकरन्दबिन्दुनिकरास्वादप्रमत्तालिना ।
> गोविन्देनकृते कृतिप्रियकृते श्रीगौरकृष्णोदये
> सर्गोऽयं निरगात् कलावतरणो नामादिमः शन्तमः ।। इति ।[१]

काव्ये शब्दालङ्काराणामनुप्रासादीनामर्थालङ्कारादीनामुपमादीनां गुणानां प्रसादादीनां, रीतीनां वैदर्भ्यादीनां शान्तवीरादिरसध्वनीनाञ्च समावेशः दर्शनीयः वर्त्तते । अत्र प्रकरणवशात् श्रीगौरकृष्णोदये रसतत्वविमर्श इति विषये किञ्चिदत्र आलोच्यते।

निखिलमिदं विरञ्चिप्रपञ्चप्रपञ्चितं जगत् पञ्चभौतिकम् । सच्चिदानन्दमयस्य परंब्रह्मणः शुक्तिकायां रजतमिव विवर्त्तरूपं, सुवर्णस्य कुण्डलमिव परिणामरूपं वेति विचारानन्तरं विभिन्नदर्शनेषु प्रतिपादितत्वात् प्रकृतेऽनावश्यकत्वाच्च न विचार्यते । सच्चिदानन्दरूपेहि परमात्मा सर्वेषु प्राणिषु जीवात्मातया प्रतीयते । जगतीति नाविदितं प्रेक्षावताम् । तत्राकाशस्य घटाकाशादि यथा– परमात्मनोऽभिन्नरूपोऽपि इमे जीवात्मनः शरीरोपाधि-वशाद्भिन्ना इव प्रतीयन्ते । आत्मा चायं सच्चिन्मयः इव सर्वतो आनन्दमयः एवेत्यत्र मनागपि संशयलेशो न जागर्त्ति ।

वैदिककाले वेदेषु 'रस'शब्दस्योल्लेख दृश्यते । यथा– सोमरसस्यार्थः 'दधानः कलशे रसम्'[२] । आनन्दार्थेऽपि 'रसो वै सः । रसो ह्येवायं लब्धानन्दी भवति'[३] ।

यद्यपि वैदिकसाहित्ये रसादि शब्दानामुल्लेखः विद्यते तथापि काव्यमीमांसाकारस्य मतेन रससंप्रदायस्य प्रवर्त्तकः नन्दिकेश्वरः । तदुक्तं तेन– ''रसाधिकारिकः नन्दिकेश्वरः'' इति ।

वाल्मीकिरामायणे शृङ्गारादिरसानां प्रयोगः दृश्यते । यतो हि क्रोञ्चबद्धोपाख्याने एकस्य दुःखं दृष्ट्वा वाल्मीकेः मुखात् शोकात्मकः श्लोकः निरगच्छत् । श्लोकेऽस्मिन् सः व्याधं शशाप । अत्र करुणरसस्य अङ्गीत्वम् । तद्यथा–

> मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
> यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ।।[४]

परन्तु यद्यपि नन्दिकेश्वरः रससंप्रदायस्य प्रवर्त्तकाचार्यः तथापि तस्य कोऽपिग्रन्थः सम्प्रति न समुपलभ्यते । अतो बुधैः भरतमुनिरेव रससंप्रदायस्य आद्य प्रवर्त्तको मन्यते ।

रससिद्धान्तस्य प्राचीनता आमनन् आचार्य: भरतमुनि: स्वकीयनाट्यशास्त्रस्य षष्ठेऽध्याये निरवधायि यत्– ''एते ह्यष्टौ रसा: प्रोक्ता द्रुहिणेन महात्मना''।[५] अनेन पूर्वाचार्याणां संकेत: लभ्यते ।

**रसस्वरूपम्—**

अध्यात्मजगति यं किल शैवा: शिवमिति ब्रह्मेति वेदान्तिन: कर्म इति मीमांसका:, कर्त्ता इति नैयायिकाश्च वदन्ति, तमेव तु साहित्यजगति आलंकारिका: विदग्धा: काव्यरसिका:, अनुभवशीला: रस: इति स्वीकुर्वन्ति । ''रसो भवति काव्यस्य महनीयं तत्त्वम्'' नि:संशयमुररी कुर्वन्ति रसवादिन: आचार्या: । अत्रैव विश्वनाथेनोक्तम्– ''वाक्यं रसात्मकं काव्यम्'' इति ।[६]

रसात्मकमित्यत्र कोनाम 'रस:' इति जिज्ञासायामाह– ''रस: नाम आनन्द:'' तदानन्द: विभावानुभावव्यभिचारिभि: संयोगात् जायते । किञ्च काव्यपठनेन, श्रवणेन, अभिनयदर्शनेन जायते ।

सामान्यत: रसपदेन मधुरयुक्तस्य तरलपदार्थस्य बोध: भवति। मधुराम्ललवणकटुकषायतिक्तभेदात् अयं षड्विध: । ऋग्वेदे अथर्ववेदेऽपि गोदुग्ध-मधु-सोमरस-जलादौ व्यपदिष्यते । आयुर्वेदे यथा-

रस: स्वादे जले वीर्ये शृङ्गारादौ विषे द्रवे ।
वाले रागे गृहे धातौ तिक्तादौ पारदेऽपि च ।।[७]

विश्वकोषेऽपि यथा–

रसो गन्धे रसे स्वादे तिक्तादौ विषरागयो: ।
शृङ्गारादौ द्रव्ये वीर्ये देहाधात्वाम्बुपारदे ।।[८]

छान्दोग्योपनिषदि यथा-

एषां भूतानां पृथिवीरस: । पृथिव्या आपो रस: अपामोषधयो रस: । वाच: ऋक् रस: । ऋच: साम: रस: । साम्नउदगीथोरस: ।[९]

अयमेव रस: अथर्ववेदादानीत: इति नाट्यशास्त्रकारस्य भरतमुनेर्मतम् । नाट्यशास्त्रस्य प्रथमाध्याये तेनैवोल्लिखितम्- रसान् आथर्वणादपि । अग्निपुराणेतु– ''वाग् वैदग्ध्यप्रधानेऽपि रस: एवात्र जीवितम्'' इति वर्णनं प्राप्यते । अस्यार्थ: तावत् वाग्वैदग्ध्यस्य प्राधान्ये सत्वेऽपि काव्यस्य प्राणभूतो भवति रस: । यद्यपि तैत्तिरीयोपनिषदि– ''रसो वै स:'' । रसो हि एवायं लब्धानन्दी भवति ।[१०] एतेन लब्धानन्द: भवति लोक: । भरतेनोक्तं रसएव काव्यस्य उत्सस्वरूप:-

''नहि रसादृते कश्चिदर्थ: प्रवर्त्तते ।''[११] इति । कविकर्मणि रसस्यैव प्राधान्यं सूचयति ।

अत: रससम्प्रदायस्याद्याचार्य: भरतमुनि:- 'रस इति क: पदार्थ:?' इत्यत्रोच्यते– आस्वाद्यमानत्वात् । कथमास्वाद्यते रस: । यथा हि- नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना: पुरुषा: रस: नास्वादयन्ति सहृदया: आत्मसाक्षात्कारमधिगच्छन्ति ।[१२] अर्थात् नानाव्यञ्जनसंस्कृतमन्नं भुञ्जानारसमास्वादयन्ति सुमनस: हर्षादिश्चाधिगच्छन्ति तथा नानाभावाभिनयव्यञ्जितान् वागङ्गसत्त्वोपेतान् स्थायिभावान् आस्वादयन्ति सुमनस: प्रेक्षका: हर्षादिश्चाधिगच्छन्ति ।' रसनिष्पत्तिप्रक्रियां वर्णयता तेनोक्तम्– ''विभावानुभावव्यभिचारि-संयोगाद् रसनिष्पत्ति: ।''[१३]

अत्र विभावा: कारणानि, अनुभावा: कार्याणि व्यभिचारिणश्च सहकारिण: सन्ति । एतेषां संयोगाद् रसस्य निष्पत्ति: भवति ।

भरतप्रतिपादितस्यास्य सूत्रस्यैव आधारे आचार्य: विश्वनाथकविराज: आह–

विभावेनानुभावेन व्यक्त: संचारिणा तथा ।
रसतामेति रत्यादि: स्थायी भाव: सचेतसाम् ।।[१४]

अर्थात् आलम्बनोदिपनाभ्यां विभावाभ्याम् उभयविधविभावज्ञानेन अनुरागप्रकाशक: स्तम्भ, स्वेदादिरूप अनुभावज्ञानेन निर्वेदादिरूप-संचारिरूपज्ञानेन च व्यञ्जित: । सामाजिकानां हृदयानां सहृदयानां वा हृदये स्थितं वासनारूप रत्यादि अनुरागप्रभृति स्थायिभावज्ञानमेव च रसस्वरूपत्वं प्रतिपाद्यते इति ।

दशरूपककारधनञ्जयोऽपि तस्य स्वरूपं प्रतिपादयामासु:। तद्यथा–

विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभि: ।
अनीयमान: स्वाद्यत्वं स्थायिभावो रस: स्मृत: ।।

आचार्यमम्मटेन रसस्वरूपमित्थं वर्णितम्–

कारणान्यथ कार्याणि सहकारीणि यानि च ।
रत्यादे: स्थायिनो लोके तानि चेन्नाट्यकाव्ययो: ।।
विभावानुभावस्तत् कथ्यन्ते व्यभिचारिण: ।
व्यक्त: स तैर्विभावाद्यै: स्थायी भावोरस: स्मृत: ।।[१५]

लोके यानि कारणानि ललनादिरूपाणि कार्याणि रत्यादि जन्यानि कटाक्षभुजोत्क्षेपकाकूक्तिप्रभृतीनि सहकारीणि निर्वेदग्लान्यादीनि वर्त्तन्ते तेषां यदि काव्ये सम्मेलनं भवति तर्हि तानि क्रमश: विभावानुभाव-व्यभिचारिभावत्वेन परिचितानि स्यु:। तै: व्यक्त: स्थायिभाव: रसरूपतामेति।

रसस्य स्वरूपं सविस्तरं व्याचक्षणेन विद्याधरेण प्रतिपादितम्। तद्यथा- विभावैर्ललनादिभिरालम्बनकारणैरङ्कुरित: सितकरकोकिलायापमलयानिल-केलिकाननादिभिरुद्दीपनकारणै पल्लवित: । अनुभावैर्नयन्तावलोक्तिस्मित-भूजवल्लोलेलनादिभि: प्रतीतिपद्धतिमध्यारोपित: व्यभिचारिभिश्चिन्तादिभि: पल्लवित: कदाचिदपि नानुभूतोऽभिधया त्रयस्त्रिंशत् संख्यकै:, नकर्णाति-चिकृतस्तात्पर्येण नलक्ष्मीकृतो लक्षणया नस्वविषयं प्रापित: रस: भवति । प्रत्यक्षेण नामत: समानमानीतोऽनुमानेन अपरिशीलितसरणि: स्मरणेन नावतान्त: कार्यतया भवति । न ज्ञातो औपचारिकज्ञाप्यतया भवति । विगलितविद्यान्तरत्वेन तत्तु अपरिमितं तत्त्वं ध्वननाभिधानाभिनव-व्यापारपरिरम्भनिर्भरतया अनुकार्यानुकर्तृगतत्वपरिहारेणसामाजिकानां वासनात्मतया स्थित: स्थायी रत्यादिको एवरस: । विभावादिजीविताविध: पानकरसन्यायेन आस्वाद्यमानचर्व्यमाणैकप्राण: समुल्लसन् ब्रह्मास्वाद एव लोकोत्तरचमत्कारकारी शृङ्गारादिको रस: इति अभिधीयते ।[१६]

रसस्य आस्वाद्यम् अनुभूतिविषयत्वं च मम्मटेन वर्ण्यते पानकरसन्यायेन चर्व्यमाण: हृदयमिव प्रविशन् अन्यत् सर्वमिवतिरोदधत्, ब्रह्मस्वादमिवानुभावयन् स्वाकारवदभिन्नत्वेन अलौकिकचमत्कारी शृङ्गारादिको रस: ।[१७]

कथमास्वाद्यते रस: इति चेत् विश्वनाथकविराज: आह–

सत्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मय: ।
वेद्यान्तरस्पर्शशून्यो ब्रह्मस्वादसहोदर: ।।
लोकोत्तरचमत्कारप्राण: कैश्चित् प्रमातृभि: ।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रस: ।।[१८]

सत्वद्रेकादितिपदेन यत्र हेतुनिर्देश: कृत: तत्रैव अखण्ड स्वप्रकाशानन्दचिन्मय: वेद्यान्तरस्पर्शशून्य: ब्रह्मस्वादसहोदर:, लोकोत्तरचमत्कारप्राण: इत्यैतै: पदै: रसस्वरूपमपि उक्तम् । स्वाकारभिन्न अर्थात् स्वाकारवदभिन्नत्वेन पदेन तस्य आस्वादनस्य प्रकारस्य कैश्चित् प्रमातृभि: इति पदेन रसास्वादनादि कारेण च निर्देश: कृत: । साहित्यशिरोमणि-आचार्यविश्वनाथकविराजेन उक्तम् अन्त: करणे रजोगुण: तमोगुणाभ्याम् असम्पृष्ट: मन: सत्वमुच्यते । तस्य सत्वगुणस्य सुन्दरस्वच्छप्रकाशरससाक्षात्कार: भवति । रसस्वरूपे तु अखण्डस्वयंप्रकाश-स्वरूप-आनन्दमयचमतकारमयानां चिन्मयपदानाम् उल्लेख: कृतोऽस्ति । रसे तु विभावादिकमपि भिन्नत्वात् सहोदरत्वं कथनमुक्तञ्च लोचनकारेण – ''परंब्रह्मस्वाद: स्वब्रह्मचारित्वंवास्तु अस्य रसास्वादनस्य ।'' एवञ्च यदाह धर्मदत्त: स्वग्रन्थे-

रसे सारश्चमत्कार: सर्वत्राऽप्यनुभूयते।
तच्चमत्कारसारत्वे सर्वत्राऽप्यद्भुतो रस:।
तस्मादद्भुतमेवाह कृती नारायणो रसम् ।।[१९]
अपि च कैश्चित् पुण्यशालिभि: यदुक्तम्-
पुण्यवन्त: प्रमिण्वन्ति योगिवद्रससन्ततिम् । इति ।[२०]

अस्य रसस्य साक्षादनुभवस्तु वैष्णवसम्प्रदायस्य मधुराख्ये महाभक्तिरसे एव भवति, यत्र स्वयं परमानन्दस्वरूपो भगवान् आलम्बनविभाव: नेत्रविक्रियारोमाञ्चादि अनुभाव:, स्थायिभाव: यै: परमानन्द-साक्षात्कारात्मको रसो महाभागवतस्य कस्यचित् पुण्यशालिन: सहृदयस्य द्रुतचित्तेऽभिव्यज्यते अत्रैव रस: सम्यक् तया प्रतिभाति ।
अथ रसस्य भेदानाह भरतेन-

श्रृङ्गारहास्यकरुणा रौद्रवीरभयानका:।
वीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसा: स्मृता: ।।[२१]

विश्वनाथेन यथा-

शृङ्गारहास्यकरुणरौद्रवीरभयानका: ।
वीभत्सोऽद्भुत इत्यष्टौ रसा: शान्तस्तथामत: ।।[२२]

अथ स्थायिभाव:–

अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमा: ।
आस्वादाङ्कुरकन्दोऽसौ भाव: स्थायीति सम्मत: ।।[२३]

अथतद्भेदानाह-

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ता: शमोऽपि च ।।[२४]

श्रीगौरकृष्टोदयमहाकाव्ये रसविन्यास: चारुतया कविना गोविन्देन पञ्चदशसर्गे कृत:। तद्यथा–

सा वै विभावमनुमथात्महेतुं तत्
सात्त्विकं क्वचिदपि व्यभिचारणञ्च ।
आसाद्य साधकजनस्य मनस्य कस्मात्
आस्वाद्यतां रसतया व्रजति द्विषड्धा ।।
आलम्बनोद्दीपनरूपभेदात्
भवेद्विभावो द्विविधो बुधानाम् ।
तत्रादिमो वैर्विषयाश्रयत्व-
भेदाद् द्विधा कृष्ण तदाश्रितौ तौ ।।
उद्दीपनो घनधनाद्रिदरीनिकुञ्ज-
कबन्धुतनया मुरलीरवादि: ।
भ्रूनर्त्तनस्मितनिरीक्षणनृत्यगीत-
स्फीतप्रसादवदनत्वमुखोऽनुभाव: ।।
स्तम्भाद्यष्टकमेव सात्त्विकमथो निर्वेददैन्यादय-
स्त्रिस्त्रिंशद् व्यभिचारिण: समुदित्यैर्व्यस्तैसमस्तैश्च वा ।
द्रागेभीरस एव केवलमुखास्वादात्मनोत्पद्यते
मत्स्यण्डीदधिसर्पिरिन्दुमरिचक्षोदैरसाली यथा ।।
गौणा हि वीरकरुणाद्भुताहास्यरौद्र-
बीभत्सभीत य इति प्रथितानि सप्त ।
आगन्तुका: क्वचन भान्ति न तादृशेषु
शान्तादयस्तु सनकादिषु पञ्चमुख्या: ।।
शान्तेस्वेश्वरगौरवं खलु गुणो दास्ये मुदासेवनं
सख्ये धार्ष्टमतीवमोहममता वात्सल्यरूपे रसे ।
गाढप्रीत्यनुरक्तमेव मधुरे ते तेषु सन्ति क्रमात्
तन्मात्राणि चतुष्कपञ्चकतया भूतेषुशब्दादिवत् ।।
माशून्यात् मनस: क्रमात् भवति सा प्रेमातिसान्द्रारति:
स्नेहो मानमयस्तत: प्रणयिता रागोनुरागस्तत: ।
भावस्याथ महादिभाव इति स प्रेमाभवेदिक्षुज:
शारान्तो गुडखण्डशर्करशिता मत्स्यण्डिकादिर्यथा ।।
प्रेमावधि: शान्तरसे रति: स्यात्
दास्ये च सख्ये त्वथ वत्सलत्वे ।
रागानुरागा प्रणयावधि: स्यात्
महादिभावावधिरन्तिमे च ।।
इत्थं पञ्चविधासु तासु मधुराभिख्यातिमुख्या रति:
त्रेधा साप्यधिकारिभेदत इह श्रेष्ठासमर्था:तत: ।
न्यूना स्यात्तसमञ्जसा तदवरा साधारणीता: स्फुटम्
राजन्ते नवगोपभीरुमहिषी कुब्जासुनित्यं क्रमात् ।।
भावावधीरतिरुदेति समानभीरौ
स्वीयासु चान्यवनितासु तथान्तिमान्तम् ।
रुढोऽधिरुढ इति भेदमितोऽन्तिमोऽसौ
पूर्वो विभाति महिषीष्वपरप्रियासु ।।
शोऽपि द्विधा भवति मादनमोहनाख्य:
शम्भोग एव बहुधा प्रथम: प्रदिष्ट: ।
स्यादन्तिम: खलु चतुर्विधविप्रलम्भेनात:
पराखिलरसस्थितिरस्ति काचित् ।।[२५]

एवं च शृङ्गारस्य वर्णनं यथा—

असंख्यलक्ष्मीस्पृहणीयलक्ष्मी-
लेशाऽपि केशाद्यसुरारिराधा ।
राधा समासाद्य यमद्य सद्यो
माद्यत्यलं स्विद्यति चावशाङ्गी ।।[२६]

करुणरसस्य आविर्भाव: यथा–

तदविमृष्य करमृष्टलोचने
मातरं मृदुपदाघ्नति प्रभौ ।
हा हतेयमिति तत्र कौतुकात्
तां प्रगृह्य वनिता विचुक्रुशु: ।।[२७]

वीररसस्य वर्णनं यथा–

कृत्वा सङ्कीर्त्तनमनुपदं सप्तभि: सम्प्रदायै:
भक्तै: सार्द्धं धुरिपरिचरन् चक्रिणं गौरकृष्ण: ।
प्रांशुश्चीरांशुकमपिदधत् प्रांशुभि: पाण्डुपिण्ड-
श्चक्रे चित्रां शिव इव महाताण्डवोद्दण्डलीलाम् ।।२८

विभत्सरसस्य उदाहरणं यथा—

शरीरमेतन्मलमूत्रमन्दिरं

मृतोपमं नित्यममेध्य मेधते ।
मदीक्षया मन्मनुदीक्षया विना
न मेध्यतामेति मथैनमज्जनैः ।।[२९]

अद्भुतरसस्य वर्णनं यथा–

अलौकिकं मिश्रसुतं विलेकितुं
विलोलचित्ताः प्रतिगृह्य तद् गृहम् ।
उपेयुरौपायनिकानि कानिचित्
वसूनि वस्तून्यशनोचितानि च ।।[३०]

शान्तरसस्य परिप्रकाशः यथा––

प्रेमावधिः शान्तरसे रतिः स्यात्
दास्ये च सख्ये त्वथ वत्सलत्वे ।
रागानुरागा प्रणयावधिः स्यात्
महादिभावावधिरन्तिमे च ।।[३१]

भावध्वनिः यथा––

नमोऽधिदेवाय विभो ध्रुवाय
समस्तलोकावयवाय तुभ्यम् ।
असीमधाम्ने मुनिगीतसाम्ने
भुम्ने भवाम्नेघ्न महामहिम्ने ।।[३२]

इत्थं श्रीगौरकृष्टोदये रसाः सहृदयहृदयाह्लादं वर्द्धयन्तः काव्यस्य शोभां सततं वर्द्धयन्ति इति दिक् ।

**पादटीका–**

१. श्रीगौरकृष्णोदयमहाकाव्यम् – १/६२
२. ऋग्वेद. ६/६३/१३ ।
३. तैत्तिरीयोपनिषत् -११/७/१ ।
४. वाल्मीकिरामायण - १/१/१ ।
५. नाट्यशास्त्रम् – ६/१६
६. साहित्यदर्पणम् – १/पृष्ट.२४
७. आयुर्वेदे ।
८. विश्वकोष ।
९. छान्दोग्योपनिषत् - १/२, पृ- ३५३ ।
१०. तैत्तिरीयोपनिषत् -११/७/१ ।
११. नाट्यशास्त्रम् –. ६/२७३ ।
१२. नाट्यशास्त्रम् –. ६/२८८ ।
१३. नाट्यशास्त्रम् –. ६/२७२ ।
१४. साहित्यदर्पणम् – ३/१ ।
१५. काव्यप्रकाशः - ४/२७-२८ ।
१६. एकावली ।
१७. काव्यप्रकाशः - १/३७ ।
१८. साहित्यदर्पणम् – ३/२,३।
१९. साहित्यदर्पणम् – ३/ पृष्ट-८७
२०. साहित्यदर्पणम् – ३/ पृष्ट-८७
२१. नाट्यशास्त्रम् – ६/१५
२२. साहित्यदर्पणम् –. ३/१८२ ।
२३. साहित्यदर्पणम् – ३/१७४ ।
२४. साहित्यदर्पणम् – ३/१७५ ।
२५. श्रीगौरकृष्णोदयमहाकाव्यम् – १५/१४-२४ ।
२६. श्रीगौरकृष्णोदयमहाकाव्यम् – १/३६ ।
२७. श्रीगौरकृष्णोदयमहाकाव्यम् – ३/३४ ।
२८. श्रीगौरकृष्णोदयमहाकाव्यम् – ११/५४ ।
२९. श्रीगौरकृष्णोदयमहाकाव्यम् – २/३० ।
३०. श्रीगौरकृष्णोदयमहाकाव्यम् – २/३५ ।
३१. श्रीगौरकृष्णोदयमहाकाव्यम् – १५/२१ ।
३२. श्रीगौरकृष्णोदयमहाकाव्यम् – २/१५ ।

**सहायकग्रन्थसूची –**


१. संस्कृतसाहित्येतिहासः – आचार्यलोकमणिदाहालः, चौखम्बाकृष्णदास अकादमी, वाराणसी।
२. संस्कृत साहित्य का अभिनव इतिहास – डा. राधावल्लभ त्रिपाठी, विश्वविद्यालय प्रकाशन वाराणसी।
३. संस्कृत साहित्य का इतिहास – आचार्य वलदेव उपाध्याय, शारदा निकेतन वाराणसी, २२१०१०।
४. बङ्गीय साहित्येर इतिहास – सुकुमार सेन, साहित्य अकादमी, दिल्ली।
५. गौराङ्गविजयः – सुकुमारसेनः, एन्‌एम्‌कलिकाता – १९५७।
६. चैतन्यचन्द्रिका – अरूपानन्ददासगोस्वामी, अनन्त कल्कि राष्ट्रियसेवापरिषदः, १९९२।
७. भगवान्‌चैतन्यदेवः – श्रीपद श्रीनिकेतनदासः, गौडीयाश्रमः, खोर्द्धा, पुरी।
८. महाप्रभु गौराङ्ग सुन्दर –सुधा सेन, सुकुमारकुन्त, कोलकाता – १३७२।
९. श्रीचैतन्यभागवत – वृन्दावनदास ठाकुर, साहित्य अकादमी, दिल्ली।
१०. श्रीचैतन्यचन्द्रामृतम्– प्रबोधानन्द सरस्वती, हरिदास शास्त्री, उत्तरप्रदेशः।
११. श्रीगौराङ्गचन्द्रोदयः – हरिदासशास्त्री, १९८२।
१२. श्रीचैतन्यचरितामृतम्– मुरारीगुप्त, मृणालकान्ति घोषः।
१३. श्रीकृष्णचैतन्यचरितामृतमहाकाव्यम्– कविकर्णपुरः, हरिदासशास्त्री – १९८३।
१४. श्रीचैतन्यचरितामृतम(संस्कृतपद्यानुवादः) – भास्करानन्दसरस्वती, श्रीक्षेत्रनाथः, कोलकाता।
१५. नाट्यशास्त्रम्– सुधा रस्तोगी - चौखम्बा कृष्णदास अकादमी , वाराणसी
१६. काव्यप्रकाशः - झलकीकारोपनाम्ना रामभट्टात्मजः वामनाचार्यः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली
१७. साहित्यदर्पणम्– आचार्य शेषराजशर्मा रेग्मी, चौखम्बा कृष्णदास अकादमी –वाराणसी
१८. ध्वन्यालोकः - आचार्यजगन्नाथपाठकः, चौखम्बा विद्याभवन, वाराणसी
१९. रसगङ्गाधरः - पण्डित मदनमोहन झा, चौखम्बा विद्याभवन, वाराणसी
२०. अलङ्कारशास्त्रेतिहासः, डॉ. रामकुमार दाधीच, हंसा प्रकाशन, जयपुर